# Shri Venkatesha Ashtakam

# શ્રીવેઙ્કટેશાષ્ટકમ્

## Document Information

Text title : veNkaTeshAShTakam

File name : venkateshAShTaka.itx

Category : aShTaka, vishhnu, venkateshwara, vishnu

Location : doc_vishhnu

Author : prabhAkara See the last two verses

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Description-comments : Brihatstotraratnavali

Latest update : July 21, 2012

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 19, 2022

*sanskritdocuments.org*

# શ્રીવેઙ્કટેશાષ્ટકમ્

શ્રીવેઙ્કટેશપદપઙ્કજ ધૂલિપઙ્ક્તિઃ
    સંસારસિન્ધુતરણે તરણિર્નવીના ।
સર્વાઘપુઞ્જહરણાયચ ધૂમકેતુઃ
    પાયાદનન્યશરણં સ્વયમેવ લોકમ્ ॥ ૧॥

શેષાદ્રિગેહતવ કીર્તિતરઙ્ગપુઞ્જ
    આભૂમિનાકમભિતઃસકલાન્પુનાનઃ ।
મત્કર્ણયુગ્મવિવરેપરિગમ્ય સમ્યક્
    કુર્યાદશેષમનિશઙ્ખલુ તાપભઙ્ગમ્ ॥ ૨॥

વૈકુણ્ઠરાજસકલોઽપિ ધનેશવર્ગો
    નીતોઽપમાનસરણિંત્વયિ વિશ્વસિત્રા ।
તસ્માદયંન સમયઃ પરિહાસવાચામ્
    ઇષ્ટંપ્રપૂર્ય કુરુ માં કૃતકૃત્યસઙ્ઘમ્ ॥ ૩॥

શ્રીમન્નારાસ્તુકતિચિદ્ધનિકાંશ્ચ કેચિત્
    ક્ષોણીપતીન્કતિચિદત્રચ રાજલોકાન્ ।
આરાધયન્તુમલશૂન્યમહં ભવન્તં
    કલ્યાણલાભજનનાયસમર્થમેકમ્ ॥ ૪॥

લક્ષ્મીપતિત્વમખિલેશતવ પ્રસિદ્ધમત્ર
    પ્રસિદ્ધમવનૌમદકિઞ્ચનત્વમ્ ।
તસ્યોપયોગકરણાયમયા ત્વયા ચ કાર્યઃ
    સમાગમૈદં મનસિ સ્થિતં મે ॥ ૫॥

શેષાદ્રિનાથભવતાઽયમહં સનાથઃ
    સત્યંવદામિ ભગવંસ્ત્વમનાથ એવ ।
તસ્માત્કુરુષ્વમદભીપ્સિત કૃત્યજાલમ્-
    એવત્વદીપ્સિત કૃતૌ તુ ભવાન્સમર્થઃ ॥ ૬॥

ક્રુદ્ધોયદા ભવસિ તત્ક્ષણમેવ ભૂપો
    રઙ્કાયતેત્વમસિ ચેત્ખલુ તોષયુક્તઃ ।
ભૂપાયતેઽથનિખિલશ્રુતિવેદ્ય રઙ્ક
    ઇચ્છામ્યતસ્તવદયાજલવૃષ્ટિપાતમ્ ॥ ૭॥

અઙ્ગીકૃતંસુવિરુદં ભગવંસ્ત્વયેતિ
    મદ્ભક્તપોષણમહંસતતં કરોમિ ।
આવિષ્કુરુસ્વમયિ સત્સતતં પ્રદીને
    ચિન્તાપ્રહારમયમેવહિયોગ્યકાલઃ ॥ ૮॥

સર્વાસુજાતિષુ મયાતુ સમત્વમેવ
    નિશ્ચીયતેતવ વિભો કરુણાપ્રવાહાત્ ।
પ્રહ્લાદપાણ્ડુસુતબલ્લવ ગૃધ્રકાદૌ
    નીચોન ભાતિ મમ કોઽપ્યત એવ હેતોઃ ॥ ૯॥

સમ્ભાવિતાસ્તુપરિભૂતિમથ પ્રયાન્તિ
    ધૂર્તાજપં હિ કપટૈકપરા જગત્યામ્ ।
પ્રાપ્તેતુ વેઙ્કટવિભો પરિણામકાલે
    સ્યાદ્વૈપરીત્યમિવકૌરવપાણ્ડવાનામ્ ॥ ૧૦॥

શ્રીવેઙ્કટેશતવ પાદસરોજયુગ્મે
    સંસારદુઃખશમનાય સમર્પયામિ ।
ભાસ્વત્સદષ્ટકમિદં રચિતં
    પ્રભાકરોઽહમનિશંવિનયેન યુક્તઃ ॥ ૧૧॥

શ્રીશાલિવાહનશકેશરકાષ્ટભૂમિ (૧૮૧૫)
    સઙ્ખ્યામિતેઽથવિજયાભિધવત્સરેઽયમ્ ।
શ્રીકેશવાત્મજૈદં વ્યતનોત્સમલ્પં
    સ્તોત્રમ્પ્રભાકર ઇતિ પ્રથિતાભિધાના ॥ ૧૨॥

ઇતિગાર્ગ્યકુલોત્પન્ન યશોદાગર્ભજ-કેશવાત્મજ-પ્રભાકર-કૃતિષુ
શ્રીવેઙ્કટેશાષ્ટકં સ્તોત્રં સમાપ્તમ્ ॥

શ્રીકૃષ્ણદાસ તનુજસ્ય મયા તુ
    ગઙ્ગાવિષ્ણોરકારિકિલ સૂચનયાષ્ટકં યત્ ।
તદ્વેઙ્કટેશમનસો મુદમાતનોતુ

તદ્ભક્તલોકનિવહાનન પઙ્ક્તિગં સત્ ॥

પિત્રોર્ગુરોશ્ચાપ્યપરાધકારિણો
ભ્રાતુસ્તથાઽન્યાયકૃતશ્ચદુર્ગતઃ ।
તેષુત્વયાઽથાપિ કૃપા વિધીયતાં
સૌહાર્દવશ્યેનમયા તુ યાચ્યતે ॥

Encoded and proofread by YV Malleswara Rao

Brihatstotraratnavali

*Shri Venkatesha Ashtakam*

pdf was typeset on August 19, 2022

Please send corrections to *sanskrit@cheerful.com*